Reg. No. : ......................................

Name : ..........................................

**FY-10**

**FIRST YEAR HIGHER SECONDARY EXAMINATION, JUNE 2022**

Part – II

**SANSKRIT**

Maximum : 80 Scores

Time : 2½ Hours

Cool-off time : 15 Minutes

*निर्देशा :*

- 15 निमेषाः समाश्वाससमयः । प्रश्नान् पठितुम् इच्छानुसारं चयितुम्, उत्तराणि क्रमीकर्तुं च अयं समयः उपयोक्तव्यः ।
- प्रश्नस्य निर्देशान् सश्रद्धं पठित्वा अवगत्य च उत्तराणि लेखनीयानि ।
- प्रश्नानाम् अङ्काः तत्र तत्र दत्ताः । उत्तरलेखनाय समयः अङ्काः च परिगणनीयाः ।

**1-9 प्रश्नेषु षण्णां (6) प्रश्नानाम् उत्तराणि कोष्ठकात् चित्वा लिखत । प्रत्येकम् एकःअङ्कः ।**

**1 മുതൽ 9 വരെയുള്ള ചോദ്യങ്ങളിൽ 6 എണ്ണത്തിന് ബ്രാക്കറ്റിൽ നിന്നും ശരിയുത്തരം തിരഞ്ഞെടുത്തെഴുതുക. 1 സ്കോർ വീതം.** **(6 × 1 = 6)**

1. न्याय्यात् पथः प्रविचलन्ति पदं न __________ ।

   (भीताः, धीराः, अशक्ताः)

2. "अये वत्स ! कस्त्वम्" ? कस्य वचनमिदम् ?

   (रत्नाकरस्य, वसिष्ठस्य, भर्तृहरेः)

3. "चिन्ताविष्टयाय सीता" नाम खण्डकाव्यं केन विरचितम् ?

   (कालिदासेन, विशाखदत्तेन, कुमारनाशान्महोदयेन)

4. संस्कृतव्याकरणस्य मुख्याचार्यः ________ ।

   (वाल्मीकिः, पाणिनिः, भास्कराचार्यः)

5. शरीरायासजननं कर्म ________ ।

   (व्यायामः, स्नानम्, स्वापः)

6. विषं निहन्ति ________ ।

   (भक्तम्, भोक्तारम्, द्रष्टारम्)

7. 'कर्णभारस्य' कर्ता कः ?

   (कालिदासः, भासः, व्यासः)

8. कः गणे न अन्तर्भवति ।

(कालिदासः, भासः, कुमारनाशान्)

9. कस्य जन्मदिनं लोकयुवजनदिनत्वेन आघुष्यते ?

(गाँधिमहाभागस्य, रवीन्द्रनाथटागोरस्य, विवेकानन्दस्य)

**10-15 प्रश्नेषु चतुर्णां प्रश्नानामुत्तराणि लिखत । प्रत्येकं द्वावङ्कौ ।**

**10-15 വരെ ചോദ്യങ്ങളിൽ നാല് എണ്ണത്തിന് ഉത്തരമെഴുതുക. 2 സ്കോർ വീതം. (4 × 2 = 8)**

10. उदाहरणानुसारं सन्धत्त ।

उदा. न + एतत् = <u>नैतत्</u> ।

(1) न + एनम् = ________ ।

(2) च + एनम् = ________ ।

11. पेटिकातः अक्षराण्युपयुज्य अर्थपूर्णं पदं लिखत ।

| कु, यु, र, च |
|---|

(1) आ ________ र्वेदः ।

(2) दिन ________ र्या ।

12. अधः प्रदत्तं श्लोकं पठित्वा संबोधनारूपस्य (संबोधनाप्रथमायाः) द्वे उदाहरणे लिखत ।

जनयित्रि ! विलोकयाम्यहं
भवतीं मां दधतीं सुवत्सलाम् ।
निजमञ्चभुवं समुज्वला –
मुपयान्तीमनघे ! वसुन्धरे !

13. उदाहरणानुसरं पदच्छेदं लिखत ।

उदा. पञ्चभिरेव – पञ्चभिः + एव

(1) कर्मभिरेव = _______ + ________ ।

(2) भ्रातृभिरेव = _______ + ________ ।

14. अधः प्रदत्तेषु उपमालङ्कारस्य उदाहरणं चित्वा लिखत ।

(1) रक्तौ तवाङ्घ्री मृदुलौ भुविविक्षेपणाद् ध्रुवम् ।

(2) हंसीव कृष्ण ! ते कीर्तिः स्वर्गङ्गामवगाहते ॥

(3) धूमस्तोमं तमश्शङ्के कोकीविरहशुष्मणाम् ।

15. पेटिकातः पदान्युपयुज्य वृत्तलक्षणं पूरयत ।

| तभजा, ससजा, जरौ |
|---|

(1) जतौ तु वंशस्थमुदीरितं _________ ।

(2) उक्ता वसन्ततिलका _________ जगौ गः ।

**16-18 प्रश्नानां उत्तराणि लिखत । प्रत्येकं त्रयोऽङ्काः ।**

**16 മുതൽ 18 വരെ ചോദ്യങ്ങൾക്ക് ഉത്തരമെഴുതുക 3 സ്കോർ വീതം.** **(3 × 3 = 9)**

16. अधः प्रदत्तं गद्यभागं पठित्वा क्त्वान्त–ल्यबन्त–तुमुन्नन्त–पदानि चित्वा लिखत ।

कर्णः स्वस्य रथम् अर्जुनसमीपं नेतुं निर्दिष्टवान् । तदा "भो कर्ण महत्तरां भिक्षां याचे" इति उच्चैः प्रार्थनाम् आकर्ण्य हयाः स्तब्धाः अभवन् । एतत् दृष्ट्वा कर्णः चिन्तामग्नः अभवत् ।

17. उदाहरणानुसारं वाक्यं परिवृत्य लिखत ।

उदाहरणम् –

रामः ग्रामं गच्छतु । रामः ग्रामं गच्छति ।

(1) बालकः संस्कृतं पठतु । बालकः संस्कृतं ________ ।

(2) श्रुती गृहं गच्छतु । श्रुती गृहं ________ ।

(3) अध्यापकः वदतु । अध्यापकः ________ ।

18. कथांशं पठित्वा सूक्तीः उद्धृत्य लिखत ।

पश्चात् गच्छन्तस्ते त्रयः कञ्चन जनपदं प्रापुः । ते सर्वे ग्रामीणैः पृथक् स्वगृहं नीतवन्तः । प्रथमः भोजनार्थं सूत्रिकामलभत । सः 'दीर्घसूत्री विनश्यती" ति सूक्तिं विचिन्त्य भोजनमत्यजत् । द्वितीयाय अपूपः दत्तः । "अतिविस्तारविस्तीर्णं तद्भवेन्न चिरायुषमि" त्युक्त्वा भक्षणं विहाय गतः । तृतीयाय माषवटिकां भोजनाय अयच्छत् । सोऽपि "छिद्रेष्वनर्थाः बहुलीभवन्ति" इत्युक्त्वा अनश्नन् गतः ।

**19-24 प्रश्नेषु चतुर्णां उत्तराणि लिखत । प्रत्येकं चत्वारः अङ्काः ।**

**19 മുതൽ 24 വരെ ചോദ്യങ്ങളിൽ 4 എണ്ണത്തിന് ഉത്തരമെഴുതുക. 4 സ്കോർ വീതം.**

**(4 × 4 = 16)**

19. रेखाङ्कितपदानां स्थाने पेटिकातः समानार्थकपदानि चित्वा खण्डिकां पुनर्लिखत ।

| दृष्ट्वा, निर्णीय, श्मशानं, पुस्तकं |
|---|

अयमस्माकं बन्धुरिति <u>निश्चित्य</u> ते तमपूजयत् । अथ <u>पितृवनं</u> परितः <u>अवलोक्य</u> तत्रैकं त्वरितं गच्छन्तम् उष्ट्रं दृष्ट्वा विस्मिताः अभवन् । तुरीयस्तु ग्रन्थं परामृश्य "धर्मस्य त्वरिता गतिः" इति पठन् "अतोऽयमेव धर्मः" इति अवदत् । <u>ग्रन्थं</u> निरीक्ष्य तुरीयेणाक्तम् ।

20. 'क' विभागे 'ख' विभागे च प्रदत्तान् श्लोकांशान् योजयित्वा श्लोकौ पूर्णरूपेण लिखत ।

| क | ख |
|---|---|
| 1. दोषेण तीव्रो विषयः कृष्णसर्पविषादपि । | राजाहमिति शब्दान्नो राजा भवितुमर्हति ।। |
| 2. अकृत्वा शत्रुसंहारं अगत्वाखिलभूश्रियम् । | विषं निहन्ति भोक्तारं द्रष्टारं चक्षुषाप्ययम् ।। |
| | क्षुधादिकृतदुःखं तु विना स्वेन न केनचित् ।। |

21. उचितान् संख्यावाचकशब्दानुपयुज्य रिक्तस्थानानि पूरयत ।

| | |
|---|---|
| 1. एकम् | 6. षट् |
| 2. ________ | 7. ________ |
| 3. त्रीणि | 8. अष्ट |
| 4. चत्वारि | 9. ________ |
| 5. ________ | 10. दश । |

22. श्लोकं पठित्वा गद्यक्रमं पूरयत ।

निजगाः प्रविचार्य दूरतो

गहनं सन्तमसं विदार्य याः ।

स्वमहांस्युपदर्शयन्ति नः

शुभताराः भवतीर्नमामि ताः ।।

गद्यक्रमः

या ________ निजगाः दूरतः प्रविचार्य ________ सन्तमसं ________ स्वमहांसि नः उपदर्शयन्ति ताः भवतीः अहं ________ ।

23. अधः प्रदत्ते संभाषणांशे रिक्तस्थानं पूरयत ।

रमेशः – नमस्ते गिरीश !

गिरीशः – ________ ।

रमेशः – त्वं ________ गच्छसि ?

गिरीशः – अहं ________ गच्छामि ।

रमेशः – विद्यालये कः विशेषः ?

गिरीशः – ________ परीक्षा प्रचलति ।

24. अधः प्रदत्तेषु **द्वौ** नाटकसङ्केतौ अधिकृत्य लघुटिप्पणीं लिखत ।

(1) आत्मगतम् ।

(2) नेपत्थ्यम् ।

(3) प्रकाशम् ।

**25 – 28 प्रश्नेषु त्रयाणां प्रश्नानामुत्तराणि लिखत । प्रत्येकं पञ्च अङ्काः ।**

**25 മുതൽ 28 വരെ ചോദ്യങ്ങളിൽ 3 എണ്ണത്തിന് ഉത്തരമെഴുതുക. 5 സ്കോർ വീതം.**

**(3 × 5 = 15)**

25. गद्यांशं पठित्वा प्रश्नानामुत्तराणि लिखत ।

अतीतेषु बहुषु संवत्सरेषु तेनैव मार्गेण प्रत्यागताः ते महर्षयः वनमध्यात् मधुरमनोहरं राममन्त्रमाकर्ण्य विस्मिताः तस्थुः । मन्त्रध्वनेः प्रभवस्थानम् एकं वल्मीकमिति ज्ञात्वा ते ऋषयस्तदभञ्जयन् । तदा अतितेजस्विनं कञ्चन मुनिश्रेष्ठम् अपश्यन् । तदा ते "वाल्मीके, उत्तिष्ठ सिद्धोऽसि" इत्यवदन् । निषादत्वात् ऋषित्वं प्राप्तस्य तस्य पुरतः ऋषयः साष्टाङ्गं प्राणमन् । अथ सः वाल्मीकिः तमसातीरे वासमारभत ।

(1) के वनमध्यात् मधुरमनोहरं राममन्त्रमाकर्ण्य विस्मिताः तस्थुः ?

(2) मन्त्रध्वनेः प्रभवस्थानं किम् ?

(3) 'इत्यवदन्' इत्यस्य पदच्छेदं लिखत ।

(4) के तस्य (निषादस्य) पुरतः साष्टाङ्गं प्राणमन् ?

(5) वाल्मीकिः कुत्र वासमारभत ?

26. यथोचितं योजयत ।

| | | |
|---|---|---|
| भागधेयम् | – | मृत्युः |
| मैत्री | – | वृक्षाः |
| मरणम् | – | मित्रता |
| तरवः | – | जन्तुः |
| पशुः | – | भाग्यम् |

27. माहेश्वरसूत्राणि क्रमीकुरुत ।

ए ओ ङ्, ऋ ऌ क्, अ इ उ ण्, ह य व र ट्, ऐ औ च् ।

28. प्रदत्तं गद्यांशं मातृभाषया आङ्गलभाषया वा अनुवदत ।

एकदा विवेकानन्दः काशीनगरसमीपम् अटन्नासीत् । तदा केचन वानराः मार्गमवरुद्ध्य अतिष्ठन् । चकितः सः ततः अधावत् । अनुधावन्तः कपयः नखदशनादिभिः तमाक्रान्तुमुद्यताः । तद्दृष्ट्वा कश्चन पथिकः तमवदत् – 'मा पलायस्व तेषामभिमुखो भव' इति ।

**29-33 प्रश्नेषु त्रयाणां प्रश्नानामुत्तराणि लिखत । प्रत्येकं षट् अङ्काः ।**

**29 മുതൽ 33 വരെ ചോദ്യങ്ങളിൽ 3 എണ്ണത്തിന് ഉത്തരമെഴുതുക. 6 സ്കോർ വീതം.**

**(3 × 6 = 18)**

29. 'क' विभागे प्रदत्तानाशयान् 'ख' विभागे प्रदत्तान् श्लोकान् च यथोचितं योजयत ।

| **'क'** (आशयाः) | **'ख'** (श्लोकाः) |
|---|---|
| (1) लोकोपकारिणः विनयान्विताः भवन्ति । | • निन्दन्तु नीतिनिपुणाः यदि वा स्तुवन्तु<br>लक्ष्मी समाविशतु गच्छतु वा यथेष्टम् ।<br>अद्यैव वा मरणमस्तु युगान्तरे वा<br>न्याय्यात् पथः प्रविचलन्ति पदं न धीराः ।। |
| (2) उत्तमजनाः विघ्नान् विगणय्य कार्यं पूर्णतां नयन्ति । | • भवन्ति नम्रास्तरवः फलागमै–<br>र्नवाम्बुभिर्दूरविलम्बिनो घनाः ।<br>अनुद्धताः सत्पुरुषाः समृद्धिभिः<br>स्वभाव एवैष परोपकारिणाम् ।। |
| (3) धीराः न्यायाधिष्ठितात् मार्गात् एकमपि पदं कदापि न व्यतिचलन्ति । | • प्रारभ्यते न खलु विघ्नभयेन नीचैः<br>प्रारभ्य विघ्नविहता विरमन्ति मध्याः ।<br>विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः<br>प्रारब्धमुत्तमजना न परित्यजन्ति ।। |

30. कथास्तम्भान् पाठभागानुसारं क्रमीकुरुत ।

- खड्गं प्रसार्य कश्चन निषादः मुनीनां पुरतः आपतत् ।
- कमण्डलुश्चेत् कमण्डलुः दातव्यं तत् इति निषादः सक्रोधमवदत् ।
- तदहं न जाने इति निषादः सक्रोधमवदत् ।
- अये वत्स ! कस्त्वम् ? केवलं कमण्डलुर्वल्कलश्च अस्माकं धनम् । तेन तव किं प्रयोजनम् ? इति वसिष्ठः अपृच्छत् ।
- पथिकानां धनप्राणापहरणं किं न पापाय ? इति वसिष्ठः रत्नाकरम् अपृच्छत् ।
- रत्नाकरो नाम निषादोऽहं पथिकानां धनानि अवश्यञ्चेत् प्राणान् चापहृत्य कुटुम्बं पोषयामि इति रत्नाकरः अवदत् ।

31. इष्टतमं श्लोकं चित्वा सकारणं विशदयत ।

(1) नहि देहिनि शोभनं भवे –
च्चरितार्थे सति जीवितं पुनः ।
सुतरां नटने समापिते ।
स च रङ्गाद्विरमेत् कुशीलवः ।।

(2) विशिखा ! निशिता विरम्यतां
क्षतमेयात् स्तिमितं न मे मनः ।
पुरतो भ्रम लोकचक्र ! मां
त्यज सीतामिह तां हतामहो ।।

(3) इह सायमुषस्सु चान्वहं
वयमाना शबलांशुकानि या
छदतेऽम्बरवेश्म तोरणं
प्रियसन्ध्ये ! भवतीं नमामि ताम् ।।

32. श्लोकं पठित्वा अधःप्रदत्तानां प्रश्नानाम् उत्तराणि लिखत ।

अकिञ्चन सन् प्रभवः स सम्पदां

त्रिलोकनाथः पितृसद्मगोचरः ।

स भीमरूपः शिव इत्युदीर्यते ।

न सन्ति याथार्थ्यविदः पिनाकिनः ।

(1) इति + उदीर्यते = ________ ?

(2) दरिद्रः इत्यर्थे प्रयुक्तं पदं किम् ?

(3) "पिनाकः अस्य अस्तीति पिनाकी, तस्य" ________ एकपदं लिखत ।

(4) श्लोकस्य आशयं विशदयत ।

33. गद्यभागं संगृह्य लिखत ।

स्वामि विवेकानन्दस्य जन्म 1863 तमे वर्षे जनुवरिमासस्य 12 तमे दिने कोलकत्ता देशे अभवत् । सः विश्वयुवकानाम् आदर्शभूतः सन्यासिवर्यः आसीत् । तस्य जन्मदिनं लोके सर्वत्र युवजनदिनत्वेन आघुष्यते । तस्य गुरुः श्रीरामकृष्णपरमहंसः आसीत् । तस्य माता भुवनेश्वरीदेवी पिता विश्वनाथदत्ता च आस्ताम् ।

अमेरिका देशे प्रचलिते विश्वधर्मसमारोहे सः भागमभजत् । तत्र तेन कृतं प्रभाषणं लोकप्रसिद्धम् अभवत् ।" अमेरिकादेशीयाः मे स्वसारः भ्रातरश्च" इति सः जनान् अभिसंबोधयति स्म । एषा घटना भारतीयसंस्कृतेः औन्नत्यं प्राकटयत् ।

सः भारतीयान् कर्मोन्मुखान् कर्तुम् आलस्यं विना अयतत । मानवेषु अन्तर्लीनायाः पूर्णतायाः परिस्फूर्तिरिव शिक्षा इति विवेकानन्दस्य मतम् । सामाजिकापचयस्य हेतुः वयमेव इति स्मरणीयम् इति च सः अवदत् । भयं विना कार्याणि करणीयानि इत्यपि सः अस्मान् अबोधयत् ।

**34-35 प्रश्नयोः एकस्य उत्तरं लिखत । अष्ट अङ्काः ।**

**34 മുതൽ 35 വരെ ചോദ്യങ്ങളിൽ ഏതെങ്കിലും ഒരെണ്ണത്തിന് ഉത്തരമെഴുതുക. 8 സ്കോർ.** **(1 × 8 = 8)**

34. समयवाचकशब्दानुपयुज्य दिनचर्यां पूरयत ।

लता प्रभाते ________ (5.00) वादने उत्तिष्ठति । शौचादीन् कृत्वा ________ (5.15) वादने सा योगाभ्यासं कर्तुम् आरभते । पुनः ________ (5.45) वादने सा चायं पिबति । _______ (6.00) वादनादारभ्य _______ (8.00) वादनपर्यन्तं सा गृहकार्याणि करोति । _______ (9.00) वादने सा विद्यालयं गच्छति । सायंकाले _______ (4.30) वादने सा गृहं प्रत्यागच्छति । सायं ________ (5.00) वादने सा सख्या साकं क्रीडार्थं बहिर्गच्छति ।

35. सूचनानुसारं पाणिनिमधिकृत्य उपन्यासं लिखत ।

**सूचना** : तक्षशिला, दाक्षीपुत्रः, मूढधीः पाणिनिः इति परिहासः, गुरुकुलात् गृहं प्रति गमनं, मात्रा साकं नदीगमनं, विद्यालाभार्थं तपः, शिवदर्शनं, माहेश्वरसूत्राणि, अष्टाध्यायी ।

___________